श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे

# ॥ श्रीवेङ्कटेशस्तोत्रम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीवेङ्कटेशस्तोत्रम् ॥

वेङ्कटेशो वासुदेवः प्रद्युम्नोऽमितविक्रमः।
सङ्कर्षणोऽनिरुद्धश्च शेषाद्रिपतिरेव च॥ १ ॥

जनार्दनः पद्मनाभो वेङ्कटाचलवासिनः।
सृष्टिकर्ता जगन्नाथो माधवो भक्तवत्सलः॥ २ ॥

गोविन्दो गोपतिः कृष्णः केशवो गरुडध्वजः।
वराहो वामनश्चैव नारायण अधोक्षजः॥ ३ ॥

श्रीधरः पुण्डरीकाक्षः सर्वदेवस्तुतो हरिः।
श्रीनृसिंहो महासिंहः सूत्राकारः पुरातनः॥ ४ ॥

रमानाथो महीभर्ता भूधरः पुरुषोत्तमः।
चोळपुत्रप्रियः शान्तो ब्रह्मादीनां वरप्रदः॥ ५ ॥

श्रीनिधिः सर्वभूतानां भयकृद्भयनाशनः।
श्रीरामो रामभद्रश्च भवबन्धैकमोचकः॥ ६ ॥

भूतावासो गिरावासः श्रीनिवासः श्रियःपतिः।
अच्युतानन्तगोविन्दो विष्णुर्वेङ्कटनायकः॥ ७ ॥

सर्वदेवैकशरणं सर्वदेवैकदैवतम्।
समस्तदेवकवचं सर्वदेवशिखामणिः॥ ८ ॥

इतीदं कीर्तितं यस्य विष्णोरमिततेजसः।
त्रिकाले यः पठेन्नित्यं पापं तस्य न विद्यते॥ ९ ॥

राजद्वारे पठेद्घोरे सङ्ग्रामे रिपुसङ्कटे।
भूतसर्पपिशाचादिभयं नास्ति कदाचन॥ १० ॥

www.prapatti.com

अपुत्रो लभते पुत्रान् निर्धनो धनवान् भवेत्।
रोगार्तो मुच्यते रोगात् बद्धो मुच्येत बन्धनात्॥ ११ ॥

यद्यदिष्टतमं लोके तत्तत्प्राप्नोत्यसंशयः।
ऐश्वर्यं राजसन्मानं भुक्तिमुक्तिफलप्रदम्॥ १२ ॥

विष्णोर्लोकैकसोपानं सर्वदुःखैकनाशनम्।
सर्वैश्वर्यप्रदं नृणां सर्वमङ्गळकारकम्॥ १३ ॥

मायावी परमानन्दं त्यक्त्वा वैकुण्ठमुत्तमम्।
स्वामिपुष्करिणीतीरे रमया सह मोदते॥ १४ ॥

कल्याणाद्भुतगात्राय कामितार्थप्रदायिने।
श्रीमद्वेङ्कटनाथाय श्रीनिवासाय ते नमः॥ १५ ॥

वेङ्कटाद्रिसमं स्थानं ब्रह्माण्डे नास्ति किञ्चन।
वेङ्कटेशसमो देवो न भूतो न भविष्यति॥ १६ ॥

॥ इति श्रीवेङ्कटेशस्तोत्रम् संपूर्णं ॥

www.prapatti.com